# ॥ आपदुद्धारक-द्वादशमुख-हनुमान्-स्तोत्रम् ॥

ॐ अस्य श्री-आपदुद्धारक-द्वादशमुख-हनुमान् स्तोत्र-महामन्त्रस्य
विभीषण ऋषिः। अनुष्टुप् छन्दः।
श्री-द्वादशमुख-प्रचण्ड-हनुमान् देवता।
मारुतात्मज इति बीजम्। अञ्जनासूनुरिति शक्तिः।
वायुपुत्रेति कीलकम्। श्रीहनुमत्प्रसादसिद्धिद्वारा सर्वापन्निवारणार्थे
जपे विनियोगः।

## ॥ ध्यानम् ॥

उष्ट्रारूढ-सुवर्चलासहचरन् सुग्रीवमित्राञ्जना-
सूनो वायुकुमार केसरितनूजाक्षादिदैत्यान्तक।
सीतशोकहराग्निनन्दन सुमित्रासम्भवप्राणद
श्रीभीमाग्रज शम्भुपुत्र हनुमान् सूर्यास्य तुभ्यं नमः ॥

खड्गं खेटक-भिन्दिपाल-परशुं पाश-त्रिशूल-द्रुमान्
चक्रं शङ्ख-गदा-फलाङ्कुश-सुधाकुम्भान् हलं पर्वतम्।
टङ्कं पर्वतकार्मुकाहिडमरूनेतानि दिव्यायुधान्
एवं विंशतिबाहुभिश्च दधतं ध्यायेद्धनूमत्प्रभुम् ॥

## ॥ स्तोत्रम् ॥

ॐ नमो भगवते तुभ्यं नमो मारुतसूनवे।
नमः श्रीरामभक्ताय श्यामास्याय च ते नमः ॥ १ ॥

नमो वानरवीराय सुग्रीवसख्यकारिणे।
लङ्काविदाहकायाथ हेलासागरतारिणे ॥ २ ॥

सीताशोकविनाशाय राममुद्राधराय च।
रावणस्य कुलच्छेदकारिणे ते नमो नमः ॥ ३ ॥

मेघनादमखध्वंसकारिणे ते नमो नमः।
अशोकवनविध्वंसकारिणे भयहारिणे ॥ ४ ॥

वायुपुत्राय वीराय आकाशोदरगामिने।
वनपालशिरश्छेत्रे लङ्काप्रासादभञ्जिने ॥ ५ ॥

ज्वलत्कनकवर्णाय दीर्घलाङ्गूलधारिणे।
सौमित्रिजयदात्रे च रामदूताय ते नमः ॥ ६ ॥

अक्षस्य वधकर्त्रे च ब्रह्मशक्तिनिवारिणे।
लक्ष्मणाङ्गमहाशक्ति-घात-क्षत-विनाशिने ॥ ७ ॥

रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय च ते नमः।
ऋक्षवानरवीरौघ-प्राणदायक ते नमः ॥ ८ ॥

परसैन्यबलघ्नाय शस्त्रास्त्रविघनाय च।
विषघ्नाय द्विषघ्नाय ज्वरघ्नाय च ते नमः ॥ ९ ॥

महाभयरिपुघ्नाय भक्तत्राणैककारिणे।
परप्रेरितमन्त्राणां यन्त्राणां स्तम्भकारिणे ॥ १० ॥

पयः-पाषाण-तरण-कारणाय नमो नमः।
बालार्कमण्डलग्रासकारिणे भवतारिणे ॥ ११ ॥

नखायुधाय भीमाय दन्तायुधधराय च।
रिपुमायाविनाशाय रामाज्ञालोकरक्षिणे ॥ १२ ॥

प्रतिग्रामस्थितायाथ रक्षोभूतवधार्थिने।
करालशैलशस्त्राय द्रुमशस्त्राय ते नमः ॥ १३ ॥

बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च।
विहङ्गमाय शर्वाय वज्रदेहाय ते नमः॥ १४॥

कौपीनवाससे तुभ्यं रामभक्तिरताय च।
दक्षिणाशाभास्कराय शतचन्द्रोदयात्मने॥ १५॥

कृत्या-क्षत-व्यथघ्नाय सर्वक्लेशहराय च।
स्वाम्याज्ञा-पार्थसङ्ग्राम-सङ्ख्ये सञ्जयधारिणे॥ १६॥

भक्तानां दिव्यवादेषु सङ्ग्रामे जयदायिने।
किल्किल्याबूबुरोच्चघोरशब्दकराय च॥ १७॥

सर्पाग्निव्याधिसंस्तम्भकारिणे वनचारिणे।
सदा वनफलाहार-सन्तृप्ताय विशेषतः।
महार्णव-शिला-बद्ध-सेतवे ते नमो नमः॥ १८॥

वादे विवादे सङ्ग्रामे भये घोरे महावने।
सिंहव्याघ्रादि चौरेभ्यः स्तोत्रपाठाद् भयं न हि॥ १९॥

दिव्ये भूतभये व्याधौ गृहे स्थावरजङ्गमे।
राजशस्त्रभये चोग्रबाधा ग्रहभयेषु च॥ २०॥

जले सर्वे महावृष्टौ दुर्भिक्षे प्राणसम्प्लवे।
पठेत् स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः।
तस्य क्वापि भयं नास्ति हनुमत्स्तवपाठतः॥ २१॥

सर्वथा वै त्रिकालं च पठनीयमिमं स्तवम्।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा॥ २२॥

विनतायाः स्वमातुश्च दासीत्वस्य निवृत्तये।
सुधार्णं यातुकामाय महापौरुषशालिने॥ २३॥

विभीषणकृतं स्तोत्रं तार्क्ष्येण समुदीरितम्।
ये पठन्ति सदा भक्त्या सिद्धयस्तत्करे स्थिताः॥ २४॥

॥ इति श्री-सुदर्शनसंहितायां श्री-विभीषणगरुडसंवादे श्री-विभीषणकृतम् आपदुद्धारक श्री-द्वादशमुख-हनुमान् स्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Apaduddharaka_Dwadashamukha_Hanuman_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits